International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(2): 23-25
© 2022 IJSR
www.anantaajournal.com
Received: 09-01-2022
Accepted: 21-02-2022

**डॉ. नवीनशर्मा**
सहायकाचार्यः, ज्योतिषविभागः
महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयः, कैथलम्, हरियाणा, भारत

**Corresponding Author:**
**डॉ. नवीनशर्मा**
सहायकाचार्यः, ज्योतिषविभागः
महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयः, कैथलम्, हरियाणा, भारत

# कृषि-कर्मणि ज्योतिर्विज्ञानस्य उपादेयता

**डॉ. नवीनशर्मा**

**DOI:** https://doi.org/10.22271/23947519.2022.v8.i2a.1667

## प्रस्तावना

प्राच्यपाश्चात्यसूक्ष्मेक्षिकावन्तो दार्शनिकाः वदन्ति यदवनितलेऽस्मिन् विद्यमानं यत्किमपि परोक्षापरोक्षं ज्ञानविज्ञानं वर्तते तत्सर्वं सुप्रसिद्धासु चतुर्दशविद्यासु निहितं वर्तते । एतासु विद्यासु वेदस्यापि गणना क्रियते । वेदस्य षट्स्वाङ्गेषु कालबोधकस्य ज्योतिषशास्त्रस्यापि वर्णनमुपलभ्यते। भूखगोलादि-स्वरूपपरिचायकं भूतभविष्यवर्तमान-शुभाशुभघटनानां द्योतकं शुभाशुभफलानाञ्च बोधकं ग्रहनक्षत्राणां गतिस्थितिसाधन-सम्बन्धिनिखिलज्ञानकारकं-ज्योतिषशास्त्रमिदं सिद्धान्तसंहिता-होरास्कन्धत्रयात्मकरूपेण विराजते भूतले ।
विषयेऽस्मिन् महर्षिपराशरेणाप्युक्तम्-

> भगवन् परमं पुण्यं गुह्यं वेदाङ्गमुत्तमम् ।
> त्रिस्कन्धं ज्यौतिषं होरा गणितं संहितेति च ।।[1]

गणितमेव विज्ञानस्य आधारशिला वर्तते यतो हि गणितं विना कस्यापि विकसितस्य ज्ञानस्य विज्ञानस्य वा विकासो न भवितुमर्हति । खगोलज्ञानं गणितं विना दुष्करमस्तीति । यथोक्तं-

> अन्तरेण गणितं गोलोऽपि न ज्ञायते ।[2]

होराशास्त्रेण जातकस्य जन्मकुण्डलीमाधारीकृत्य सम्पूर्णजीवनस्य शुभाशुभफलं ज्ञायते । संहिता शब्दस्यार्थः सङ्ग्रहः । ज्योतिषशास्त्रस्य अनेकभेदाः उपभेदाश्च वर्तन्ते, तेषामेकस्मिन् स्थाने एकत्रीकरणस्य समाहारस्वरूपं संहिता कथ्यते। स्कन्धेऽस्मिन् जीवनेन सम्बन्धितानां सर्वेषां लौकिकोपयोगीनां विषयाणां वर्णनं वर्तते । सम्यक् हितप्रतिपादकोऽयं शब्दः संहिता कथ्यते । अतः यस्मिन् शास्त्रे समाजहितस्य सम्यक् प्रकारेण प्रतिपादनं क्रियते तच्छास्त्रं नाम संहिता । येन प्रकारेण धर्मसंहिताकृत्याधारे राष्ट्रहितचिन्तनं क्रियते तथैव ज्योतिषशास्त्रस्य संहितास्कन्धेऽस्मिन् वैज्ञानिकाधारे प्राकृतिकतत्त्वानां शुभाशुभफलस्पष्टं कृत्वा राष्ट्रहिते समाजे वा अनेकेषां सिद्धान्तानां प्रतिपादनं क्रियते। संहिताग्रन्थैः ग्रहाणां स्थित्या सुभिक्ष- दुर्भिक्ष-सुवृष्टि-अतिवृष्टि-अग्निभय-उपद्रवादीनां शुभाशुभफलस्य ज्ञानं प्राप्यते । अतः उन्नतिर्भवितुमर्हति । कृषिविज्ञानं ज्ञातुं अनेन ज्ञानेन कृषिविज्ञाने ज्योतिषशास्त्रान्तर्गतः पञ्चाङ्गबोधोऽत्यावश्यकः। पञ्चाङ्गेऽस्मिन् पञ्चानामाङ्गानां समाहारो भवति यथोक्तं भारतीयकुण्डलीविज्ञाने-

तिथिः वासरनक्षत्रे योगः करणमेव च
इति पञ्चाङ्गमाख्यातं व्रतपर्वनिदर्शकम् ।।[3]

**नारदपुराणे-**

संहिताशास्त्ररूपञ्च ग्रहचारोऽब्दलक्षणम् ।
तिथिवासरनक्षत्रयोगतिथ्यर्धसंज्ञकाः ।।[4]

एतेषां पञ्चाङ्गानामाधारेणैव शुभसमयनिर्धारणं क्रियते । अस्य "मुहूर्त" इति व्यवहारः । यस्यार्थः "मुहुः तारयतीति मुहूर्तः"[5] । मुहूर्तस्य विवरणमपि ज्योतिषशास्त्रस्य संहितास्कन्धेऽन्तर्भवतीति । शुभमुहूर्ताः समाजस्य उन्नयनार्थं सहायकाः भवन्ति । इमे मानवं कष्टसागरात् तारयन्तीति क्रियमाणस्य कर्मणः सम्पूर्ण–शुभफलमपि यच्छन्ति । यथा अकाले कृतं भोजनं विषं भवति तथैव अकाले कृतानि कृषिकर्माणि विपरीतफलं यच्छन्ति। वेदविहितकर्मणां शुभकालनिर्णयार्थमेव वेदाङ्गभूतस्य ज्योतिषशास्त्रस्य आरम्भः जातः । अतः कृषिकर्मण्यपि कालनिर्णयः एव ज्योतिषशास्त्रस्य परमं लक्ष्यम् । कालविधानशास्त्रस्य गर्ग-पराशर- वशिष्ठ-व्यास-कश्यपादिभिः अष्टादशमहर्षिभिः प्रणीताः बहवः आर्षग्रन्थाः प्रमाणभूताः विद्यन्ते। मुनिवचनानि सम्यक् विचार्य तेषां सारं संगृह्य रचितनिर्णायकपौरूषेयग्रन्थाः मुहूर्तचिन्तामणिः, मुहूर्तकल्पद्रुमः, मुहूर्तमार्त्तण्डः, मुहूर्तवृन्दावनप्रभृतयः लोकेऽस्मिन् प्रसिद्धाः वर्तन्ते । एतेषु ग्रन्थेषु निहितमुहूर्तविषयकज्ञानेन तस्य सुष्ठुप्रयोगेण च कृषिविज्ञानस्य उत्तरोत्तरोन्नतिर्भवितुम् अर्हति ।
आधुनिककृषिवैज्ञानिकयन्त्राणि
अत्यधिकोष्णशीतप्रभावात् कार्यं कर्तुं न प्रभवन्ति। तत्र गोचरस्थैः सूर्यादिज्योतिर्पिण्डैः दिक्-देश-कालादीनां बोधं सम्यक्तया कृत्वैव कृषिकर्मणि हलप्रवहण-बीजवपन-लतापादपादिरोपण-सस्यरोपण-धान्यच्छेदन-धान्यस्थापन-नवान्नभक्षण- मुहूर्तादीनां निर्णयः क्रियते ।'
तत्र मुहूर्तचिन्तामणौ हलप्रवहणस्य विषये वर्णितमस्ति यथा-

मूलद्वीशमघाचरध्रुवमृदुक्षिप्रैर्विनार्कं शनिं
पापैर्हीनबलैर्विधौ जललवे शुक्रे विधौ मांसले ।
लग्ने देवगुरौ हलप्रवहणं शस्तं न सिंहे घटे
कर्काजेणघटे तनौ क्षयकरं रिक्तासु षष्ठ्यां तथा ।।[6]

अर्थात् मूलविशाखामघाभिश्चरध्रुवमृदुक्षिप्रैश्च मूलनक्षत्रम्, द्वीशः = विशाखा, मघा, चरान्तर्गतेषु स्वाति पुनर्वसु-श्रवण-धनिष्ठा-शतभिषा = नक्षत्रेषु, क्षिप्रान्तर्गतेषु = हस्त-अश्विनि-पुष्य-अभिजिन्नक्षत्रेषु विनाऽर्क शनिं = रविवासरं शनिवासरं च त्यक्त्वा, पापग्रहाणां निर्बलत्वे सति, विधौ जललवे चन्द्रे जलचरराशिनवांशगते सति, शुक्रे विधौ मांसले = शुक्रस्य चन्द्रस्य च बलसंयुक्तावस्थायां गुरुलग्ने स्यात्तदा हलेन भूमिकर्षणं शुभं भवति । सिंह- कुम्भ- कर्क- मेष- मकर-तुलालग्नेषु रिक्तातिथिषु (४, ६, १४) षष्ठीतिथौ च हलप्रवहणम् अशुभं भवति ।
तत्रैव कश्यपेनाप्युक्तं यथा-

गुरौ लग्नगते शुक्रे बलिन्यापोदये विधौ ।
शस्ता कृषिक्रिया तत्र दुर्बलैः क्रूरखेचरैः ।।[7]

ज्योतिः सारसागरे-

मेषलग्ने पशून् हन्ति कर्कटे जलजं भयम् ।
सिंहे सस्यभयं ज्ञेयं तुलायां हलसंक्षयः ।।
मकरे शस्यनाशः स्यात्कुम्भे चौरभयं तथा ।
हन्त्यष्टमी बलीवर्दान्नवमी सस्यघातिनी ।।
षष्ठी च कीटजननी पशून्हन्ति चतुर्दशी ।
चतुर्थ्यामपि इदमेवफलम् ।[8]

बीजवपनमुहूर्तः

एतेषु श्रुतिवारूणादितिविशाखोडूनि भौमं विना
बीजोप्तिर्गदिता शुभा त्वगुभतोऽष्टाग्नीन्दुरामेन्दवः।
रामेन्द्वग्नियुगान्यसच्छुभकराण्युप्तौ हलेऽर्कोज्झिता-
द्भाद्रामाष्टनवाष्टभानि मुनिभिः प्रोक्तान्यसत्सन्ति च ।।[9]

एतेषु = उक्तनक्षत्रेषु, श्रुतिः = श्रवणः, वारुणम् = शततारकाः, अदितिः = पुनर्वसु, विशाखा, एतानि नक्षत्राणि, भौमवासरं विना अवशिष्टेषु दिननक्षत्रेषु बीजोप्तिमुहूर्त्तः कथितः। अगुभतः = राहुः अधिष्ठितनक्षत्रात् अष्ट, अग्निः त्रीणि, इन्दुः = एकः, रामत्रयः इन्दुरेकः अग्निस्त्रयः युगः = चत्वारः, असत् = अशुभानि शुभकराणि शुभानि च बीजवपने क्रमेण भवन्ति ।
हलचक्रे सूर्येण भुक्त, भुक्त्यनन्तरं त्यक्तनक्षत्रात् रामः = त्रयः, अष्ट, नव, अष्टनक्षत्राणि पूर्वाचार्यैस्तत्त्वदर्शिभिः कथितानि एतानि क्रमेण अशुभानि शुभानि च भवन्ति।
धान्यच्छेदनमुहूर्तः-

तीक्ष्णाजपादकरवन्हिवसुश्रुतीन्दु-
स्वातीमधोत्तरजलान्तकतक्षपुष्ये ।
मन्दारक्तिरहिते दिवसेऽतिशस्ता
धान्यच्छिदा निगदिता स्थिरभे विलग्ने ।।[10]

तीक्ष्णसंज्ञकनक्षत्रेषु, कृतिका, मृगशिरा, उत्तरात्रयम्, पूर्वाभाद्रपद, हस्त, धनिष्ठा, श्रवण, स्वाति, पूषा, भरणी, चित्रा, पुष्यञ्च एतेषु एकोनविंशतिनक्षत्रेषु कस्मिन्नपि एकस्मिन् नक्षत्रे एवं स्थिरलग्नेषु शनिभौमरिक्तातिथीन् च परित्यज्य शेषतिथिवासरेषु धान्यच्छेदनं शुभं भवति ।
धान्यस्थापनमुहूर्तः –

मिश्रोग्ररौद्रभुजगेन्द्रविभिन्नभेषु
कर्काजतौलिरहिते च तनौ शुभाहे ।
धान्यस्थितिः शुभकरी गदिता, ध्रुवेज्य
द्वीशेन्द्रदस्रचरभेषु च धान्यवृद्धिः ।।[11]

अर्थात् मिश्रसंज्ञक (विशाखा, कृत्तिका) - उग्रसंज्ञक (पूर्वात्रयम्, भरणी, मघा) - आर्द्रा, आश्लेषा, ज्येष्ठानक्षत्रञ्च परित्यज्य शेषनक्षत्रेषु एवं मेष-कर्क–तुला- लग्नानि विहाय सर्वेषु लग्नेषु शुभदिवसेषु च अन्नस्थापनं शुभकारकं वर्तते। ध्रुवसंज्ञक (उत्तरात्रयम्, रोहिणी)-नक्षत्रेषु, पुष्य, विशाखा, ज्येष्ठा, अश्विनी एवं चरसंज्ञकेषु (स्वाती, पुनर्वसु, श्रवण, धनिष्ठा, शतभिषा) नक्षत्रेषु अन्नव्यवहारः (क्रयविक्रयञ्च) वृद्धिकारको भवति । सन्दर्भेऽस्मिन् हलचक्र-राहुचक्र-आदीनामुपयोगोऽपि दृश्यते।
कृषिविज्ञानस्य उन्नयनार्थं ज्योतिषशास्त्रस्य मार्गदर्शनेनैव सर्वाणि कार्याणि सम्पादनीयानि तदैव अस्माकं धर्मार्थकाममोक्षपुरूषार्थचतुष्टयं सिद्धयति यतो हि श्रीमद्भगवद्गीतायामप्युक्तं-

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवन्ति पर्जन्यो यज्ञः कर्मसमुद्भवः ।।[12]

अतः पंजाब-हरियाणा-उत्तरप्रदेशादिषु राज्येषु यत्र वृहद्रूपेण कृषिकार्यं भवति तत्र तु कृषेः उन्नयनार्थं ज्योतिषशास्त्रमत्युपयोगी सिद्धयति, यतो हि तत्र बीजवपनं, सस्यरोपणं, धान्यच्छेदनं, धान्यस्थापनञ्च वृहद्रूपेण दृश्यते, अत्र नास्ति संशयः । यतो हि शास्त्रं विना यत्कर्म क्रियते, तस्मिन् विषये भगवता श्रीकृष्णेनोक्तं श्रीमद्भगवद्गीतायां यथा-

अशास्त्रं विहितं घोरं तप्यन्ते ये तपोजनाः ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः।। [13]
यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।। [14]
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ।। [15]

अतः ज्योतिषशास्त्रमिदं कृषिविज्ञानेऽत्यधिकोपयोगी सिद्धयतीत्यत्र नास्ति संशयः ।

## सन्दर्भ


1. बृहत्पाराशरहोराशास्त्रम् अ, ०१ श्लो. सं. ०२
2. सिद्धान्तशिरोमणिः, गोलप्रशंसाध्यायः श्लो. सं. ०६
3. भारतीय कुण्डली विज्ञान, पृ. सं. ०२. मीठालाल हिमंतराम ओझा, वाराणसी
4. नारदपुराणम्
5. मुहूर्तमार्तण्डः (भूमिका)
6. मुहूर्तचिन्तामणिः नक्षत्रप्रकरणम्- २ श्लो. सं २८
7. मुहूर्तचिन्तामणिः, नक्षत्रप्रकरणम् -२ पृ. सं. ६६
8. ज्योतिसारसागरः
9. मुहूर्तचिन्तामणिः, नक्षत्रप्रकरणम् -२ श्लो. सं. २६
10. मुहूर्तचिन्तामणिः, नक्षत्रप्रकरणम् -२ श्लो. सं. ३१
11. मुहूर्तचिन्तामणिः, नक्षत्रप्रकरणम्-२ श्लो. सं. ३३
12. श्रीमद्भगवद्गीता, अ. ३. श्लो. सं. १४
13. श्रीमद्भगवद्गीता अ. १७ श्लो. सं. ०५
14. श्रीमद्भगवद्गीता अ. १६ श्लो. सं. २३
15. श्रीमद्भगवद्गीता अ. १६ श्लो. सं. २४